**॥श्री स्वामी सामर्थ ॥**

---

# ॥श्री महामृत्युञ्जय कवच ॥

---

भैरव उवाच ।

शृणुष्वपरमेशानि कवचं मन्मुखोदितम ।

महामृत्युञ्जयस्यास्य न देयं परमादभुतम ॥ १ ॥

त्रैलोक्याधिपतिर्भूत्वा सुखितोऽस्मि महेश्वरि ।

यं धृत्वा य पठित्वा च यं श्रुत्वा कवचोत्तमम । ॥ २ ॥

तदेव वर्णयिष्यामि तव प्रीत्यावरानने ।

तथापि परमं तत्त्वं न दातव्यं दुरात्मने ॥ ३ ॥

विनियोगः

ॐ अस्य श्रीमहामृत्युञ्जयकवचस्य श्रीभैरवऋषिः।

गायत्रीछन्दः । श्रीमृत्युञ्जय रुद्रो देवता । ॐ बीजम् ।

जूं शक्तिः । सः कीलकम् । हौं इति तत्त्वम ।

चतुर्वर्गफलसाधने पाठे विनियोगः ।

ॐ चन्द्रमण्डल मध्यस्थे रुद्रमाले विचित्रिते ।

तत्रस्थं चिन्तयेत्साध्यं मृत्युं प्राप्नोति जीवति ॥

ॐ जूं सः हौं शिरः पातु देवो मृत्युञ्जयो मम् ।
श्रीशिवो वै ललाटं च ॐ हौं भ्रुवो सदाशिवः ।।

नीलकण्ठोऽवतान्नेत्रे कपर्द्दी मेवताऽछ्रुति ।
त्रिलोचनोऽवतां गण्डौ नासां में त्रिपुरान्तकः ।। ६ ।।

मुखं पीयूषघटभृदोष्टौ में कृत्तिकाम्बरः ।
हनुं मे हाटकेशानो मुखं वटुकभैरवः ।। ७ ।।

कन्धरां कालमथनो गलं गणप्रियोऽवतु ।
स्कन्धौ स्कन्दपिता पातु हस्तौ मे गिरिशोऽवतु ।। ८ ।।

नखान्मे गिरिजानाथः पायादंगुलिसंयुतान ।
स्तनौ तारापतिः पातु वक्षः पशुपतिर्मम् ।। ९ ।।

कुक्षिं कुबेरवदनः पार्श्वौ मे मारशासनः ।
शर्वं पातु तथा नाभिं शूली पृष्ठं ममाऽवतु ।। १० ।।

शिश्नं में शङ्करः पातु गुह्यं गुह्यकवल्लभः ।
कटिं कालान्तकः पायादूरु मेंधकघातकः ।। ११ ।।

जागरुकोऽवताज्जानू जङ्घे मे कालभैरवः ।
गुल्फौ पायाज्जटाधारी पादौ मृत्युञ्जयोऽवतु ।। १२ ।।

पादादिमूर्द्धपर्यन्तं सद्योजातु ममावतु ।
रक्षाहीनं नामहीनं वपुः पात्वमृतेश्वरः ।। १३ ।।

पूर्वे बलविकरणो दक्षिणे कालशासनः ।
पश्चिमे पार्वती नाथ उत्तरे मां मनोन्ममः ।।

ऐशान्यामीश्वरः पायादाग्नेयामग्निलोचनः ।
नैऋत्यां शम्भुरव्यान्मां वायव्यां वायुवाहनः ।।

ऊर्ध्वं बलप्रमथनः पाताले परमेश्वरः ।
दक्षदिशू दास पातु महामृत्युञ्जयश्च माम् ।।

रणेराजकुले द्यूते विषमे प्राणसंशये ।
पायादोजूं महारुद्रो देवदेवो दशाक्षरः ।।

प्रभाते पातु मां ब्रह्मा मध्याह्ने भैरवोऽवतु ।
सायं सर्वेश्वरः पातु निशायां नित्यचेतनः ।।

अर्द्धरात्रे महादेवो निशान्ते मां महोदयः ।
सर्वदा सर्वतः पातु ॐ जूं सः हौं मृत्युञ्जयः ।।

इतीदं कवचं पुण्यं त्रिषु लोकेषु दुर्लभम् ।
सर्वमन्त्रमयं गुह्यं सर्वतन्त्रेषु गोपितम् ।।

पुण्यं पुण्यप्रदं दिव्यं देवदेवादिदैवतम् ।

य इदं च पठेन्मन्त्रं कवचं वाचयेत्ततः ।।

तस्य हस्ते महादेवि त्र्यंबकस्याष्टसिद्धयः ।
रणे धृत्वा चरेद्‍युद्धं हत्वा शत्रुञ्जयं लभेत् ।।

जपं कृत्वा गहे देवि सम्प्राप्स्यति सुखं पुनः ।
महाभये महारोगे महामारी भये तथा ।।

दुर्भिक्षे शत्रुसंहारे पठेत्कवचमादरात् ।

।। महामृत्युञ्जय कवच समूर्णं ।।

॥ श्रीगुरुदत्तात्रेयार्पणमस्तु ॥
॥श्री स्वामी समर्थापर्ण मस्तु॥

---